संस्कृतवार्ता:

दिनाङ्क :-06.09.2024

प्रात: - 06:55

राष्ट्रपति:-अध्यापका:

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: सबलं प्रत्यपादयत् यत् बालाः देशस्य भविष्यं सन्ति। तावत् शिक्षकाणां कर्तव्यमिदं भवेत् यत्ते बालेषु नैतिकमूल्यस्य आलोचनात्मक-विचारगत-कौशलस्य समाजं प्रति कर्तव्यस्य च भावनायाः सर्जनं कुर्वन्तु इति। अवधेयास्पदं वर्तते यत् राष्ट्रपतिः मुर्मुः ह्यः नवदिल्ल्यां द्वयशीतिः शिक्षकेभ्यः राष्ट्रियशिक्षकपुरस्कारं प्रदत्तवती। अत्रावसरे अनया भणितं यत् महिलाः प्रति सम्मानं वाचिकरूपेण मा भवेत् अपि तु व्यवहारे तस्य प्रदर्शनं करणीयम्।

राष्ट्रपतिः अग्रे अब्रवीत् यत् कस्यापि समाजे महिलास्थितिः तस्य विकासाय महत्वपूर्णं मानदण्डं भवतीति। राष्ट्रपतिः शिक्षकान् सम्बोधयन्ती प्रोक्तवती यत् तेषां विद्यार्थिभ्यः समागताः वंशाः विकसितभारतस्य निर्माणे महत्वपूर्णभूमिकां निभालयिष्यन्ति। एकः महान्-शिक्षकः राष्ट्रं विनिर्माति अपि च शिक्षकाः एव छात्रान् प्रेरयन्तः भारतं ज्ञानकेन्द्रं निर्मास्यन्ति।

सिङ्गापुर्-भ्रमणम्

भारत-सिङ्गापुर्-देशयोः मध्ये स्वास्थ्य-चिकित्सा-शिक्षा-कौशल-विकास-प्राविधिक-प्रौद्योगिकी-भारत-सिङ्गापुर्-अर्धचालक-प्रणालीनां क्षेत्रेषु सहकारार्थं मन्त्रिस्तरीयाणां चतुर्णां सहमति-पत्राणाम् आदानप्रदानम् हस्ताक्षरम् च जातम्। उभावपि देशौ स्वसम्बन्धान् समग्र-सामरिकसहभागित्वं वर्धयितुं सहमतौ अभवताम्, येन हि भारतस्य एक्ट्-ईस्ट्-इति नीतिः प्रमुखतया प्रवर्धिता भविष्यति। ह्यः प्रधानमन्त्रिणः नरेन्द्रमोदिनः सिङ्गापुर्-देशस्य प्रधानमन्त्रिणा लॉरेन्स्-वोङ्ग्-इत्यनेन सह प्रतिनिधिस्तरीय-वार्तायाः अनन्तरं अयं निर्णयः कृतः।

सिङ्गापुर्-नगरे वार्तालापकाले उभौ नेतारौ द्विपक्षीय सम्बन्धानां प्रगतिं समीक्षितवन्तौ। आर्थिकसम्बन्धेषु प्रबलां प्रगतिं अवलोक्य उभौ पक्षौ देशयोः मध्ये व्यापारस्य निवेशस्य च प्रवाहस्य विस्ताराय आह्वानम् अकुरुताम्। प्रधानमन्त्री मोदी सिङ्गापुर-देशस्य राष्ट्रपतिना थर्मनषण्मुगरत्नम् इत्यनेन सह अपि मिलितवान्।

<u>रक्षामन्त्री-सशस्त्रबलानि</u>

रक्षामन्त्री राजनाथसिंहः ह्यः सशस्त्रबलानां शीर्षाधिकारिभिः आग्रहं कृतवान्यत्ते रूसयूक्रेन-युद्धं इजराइल-हमास-सङ्घर्षं बांङ्ग्लादेशस्य च वर्तमानां स्थितिं चावलम्ब्य सञ्चेतिताः भवेयुः। रक्षामन्त्री उत्तरप्रदेशस्य लखनऊनगरे संयुक्तसेनाध्यक्षाणां सम्मेलनस्य द्वितीयस्य अन्तिमस्य च दिवसस्य उपवेशनस्य अध्यक्षतां कृतवान्। असौ उत्तरीयसीम्नि क्षेत्रीयशान्तये स्थिरतायै च सङ्कटोत्पन्नानां प्रतिवेशि-देशानां घटनाक्रमान् अवलोक्य वरिष्ठसैन्याधिकारिभिः व्यापक-विश्लेषणस्य महत्वं प्रख्यापितवान्। अस्य सम्मेलनस्य विषयो विद्यते-सशक्तं सुरक्षितं च भारतं-सशस्त्रबलेषु संशोधनमिति।

<u>संयुक्तारबामीरातः-शिक्षा</u>

संयुक्तारबामीराते भारतीयशिक्षां सुदृढीकर्तुं एकस्मिन् इतिवृत्ते पदक्षेपे केन्द्रीयमाध्यमिकशिक्षामण्डलेन सीबीएसईइत्यनेन भारतात् बहिः दुब्य्यां स्वस्य प्रथमस्य क्षेत्रीयकार्यालयस्य उत्कृष्टताकेन्द्रस्य च उद्घाटनं कृतम्। दुबय्यां नवोद्घाटितः अयं क्षेत्रीयकार्यालयः तत्र परीक्षाणां व्यवस्थायां महत्वपूर्णभूमिकां निर्वक्ष्यति।

<u>पैरालम्पिक</u>

पेरिस-पैरालम्पिक-क्रीडासु भारतस्य जूडोक्रीडकः कपिलपरमारः पुरुषाणां षष्टिकिलोग्राममितस्य पैरा-जूडो-द्वन्द्वस्य प्रतियोगितायां ब्राजीलदेशस्य एलील्टन-डी-ओलिवेरां पराजित्य अस्याः स्पर्धायाः भारताय ऐतिह्यं प्रथमं कांस्यपदकं समर्जितवान्।

सम्प्रति प्रतिस्पर्धासु अष्टमे दिने भारतस्य स्यूते पञ्चसुवर्णपदकानि नवरजतपदकानि एकादश च कांस्य पदकानि निहितानि सन्ति। पदकतालिकायं भारतं षोडशस्थानं भजते।

।।इति वार्ता:।।